# Shri Sheshachandrikacharya Stotram

# શ્રીશેષચન્દ્રિકાચાર્યસ્તોત્રમ્

## Document Information

Text title : Shri Sheshachandrikacharya Stotram

File name : sheShachandrikAchAryastotram.itx

Category : deities_misc, gurudev

Location : doc_deities_misc

Author : vidyAratnAkaratIrtha

Transliterated by : Krishnananda Achar

Proofread by : Krishnananda Achar

Description/comments : PanchayatistutiH

Acknowledge-Permission: C Narayanarao

Latest update : June 15, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 15, 2020

*sanskritdocuments.org*

# શ્રીશેષચન્દ્રિકાચાર્યસ્તોત્રમ્

શ્રીપૂર્ણબોધસમયામ્બુધિચન્દિરાય
    વિજ્ઞાનભક્તિમુખસદ્ગુણમન્દિરાય ।
હૃન્નીરજાન્તરવભાસિતસેન્દિરાય
    કુર્વે નમાંસિ રઘુનાથયતીશ્વરાય ॥ ૧॥

ગોપાલપાદ સરસીરુહસક્તચિત્તમ્ ।
    દ્વૈપાયનાર્યસમયેનિશમપ્રમત્તમ્ ।
પાપાદ્રિભેદકુલશાયિતભવ્યવૃત્તં
    ભૂપારિજાતમનિશં સ્મરશુદ્ધહૃત્તમ્ ॥ ૨॥

લક્ષ્મીનારાયણાખ્યવ્રતિવરકરકઞ્જાત જાતસ્વધીત
    પ્રાજ્ઞપ્રજ્ઞાગમૌઘક્ષિતિસુરનિકરારાધિતાઙ્ઘ્ર્યબ્જયુગ્મઃ ।
સહ્યક્ષ્માભૃદ્દુહિત્રાસ્ફટિકકપિલલોઃ સઙ્ગમે જાતવેદો
    મૂર્ધન્યે રાજમાનો વહતુ મયિ કૃપાં સ્વીયદાસાનુદાસે ॥ ૩॥

વન્દમાનજનસંસદપેક્ષ્યં સાદયામ્યહમિતિ સ્થિરદીક્ષમ્ ।
સંસદિ ક્ષણવિદૂતવિપક્ષં કંસભિત્સુગુણસાધન દક્ષમ્ ॥ ૪॥

વ્યાસરાજયતિવર્યમુખોદ્યચ્ચન્દ્રિકોર્વરિતપૂર્તિકૃતં તમ્ ।
ભાવયામિ સુરભૂમિરુહઙ્ગામાગતં ક્ષિતિનુ(સુ)રાર્થનયાહમ્ ॥ ૫॥

ઘોરહૃત્તિમિર સન્તતિસૂર્યં ધીરશેખરમપાતકચર્યમ્ ।
નોનવીષિ યદિ મસ્કરિવર્યં ભૂસુરવ્રજસિ સંસદિ શૌર્યમ્ ॥ ૬॥

રેત્યુક્ત્વા લભતે રઘૂદ્વહકૃપાઙ્ઘ્રત્યેદુક્ત્વાક્ષણાત્
    સ્યાદેવૈષ ઘુધાતુવાચ્યકૃતિમાન્ નાશબ્દિતોનાથવાન્ગ્ ।
થસ્યોચ્ચારણતો લભેત તપસઃ સિદ્ધિં યદાખ્યાક્ષરૈઃ
સર્વ।ં ચૈતદવાપ્નુતેકિમુત તન્નામ્નેખિલસ્યોક્તિતઃ ॥ ૭॥

રુક્મિણીશચરણામ્બુજસેવાસાદિતાનિતરલભ્યવિભૂતે ।

વ્યાસરાજયતિશેખર વિદ્યાવિષ્ઠરેશ કરુણાં મયિ કુર્યાઃ ॥ ૮॥

પદવાક્યપ્રમાણાં ભોનિધિ પારીણતાભૃતે ।
સર્વતન્ત્રસ્વતન્ત્રાય પ્રણમામિ મુહૂર્મુહુઃ ॥ ૯॥

શ્રીશેષચન્દ્રિકાચાર્ય પદપઙ્કજસંસ્કૃતિઃ ।
અતિશેતે દેવગવી ચિન્તામણિ સુરદ્રુમાન્ ॥ ૧૦॥

રઘુનાથ યતીશાનઃ પાતુ માં શરણાગતમ્ ।
શરણાગતવાત્સલ્યમાત્મીયં દર્શયન્મયિ ॥ ૧૧॥

સર્વોત્તમો હરિરશેષ જગન્નમિથ્યા
    ભેદશ્ચ જીવનિકરોનુચરોચિતસ્ય ।
નીચોચ્ચતાસ્ય ચ મિથોનિજમોદ લાભો-
    મુક્તિસ્સભક્તિતઃ ઉરુક્રમણેખિલેશે ॥ ૧૨॥

અક્ષાદિત્રિતયં પ્રમાણમખિલામ્નાયૈકવેદ્યો હરિઃ
    વૃત્તિર્મુખ્યતમા યતોસ્યકમલાનાથે સ્વતન્ત્રો હરિઃ ।
સર્વં ચૈતદધીનમિત્યપિ દૃઢં સંસાધયિત્વાખિળં
    દુર્વાદં સમખણ્ડયત્સદસિ યો મેદાં દિશેત્સોમલામ્ ॥ ૧૩॥

કણ્ઠે શ્રીતુળસીસ્રજં હૃદિ દદચ્છ્રીવલ્લભં કર્ણયો-
    ર્દ્વન્દે શ્રીતુળસીદળે કરસરોજાતદ્વયે પુસ્તકમ્ ।
મુદ્રોલ્લાસિતમૂર્ધ્વપુણ્ડ્રનિકરં કાયે દધાનોન્તિક
    ભ્રાજદ્દણ્ડકમણ્ડલુર્ગુરુવરઃ શ્રેયોર્થિભિશ્ચિન્ત્યતાં ॥ ૧૪॥

રઘુનાથયતીશ તાવકીનાખિલલક્ષ્માણ્યનુસન્દધન્નિજાનિ ।
હરતેકુમતિર્યઃ આર્યવર્યદ્રુહિ તસ્મિન્નનુકુલતાંલ ન યુયુઃ ॥ ૧૫॥

વ્યાસરાજમઠોસ્માકં મઠ એવેતિ વાદિનમ્ ।
શિક્ષસ્વગુરુવર્યાશુ યદ્યસ્ત્યાત્મમઠે કૃપા ॥ ૧૬॥

રઘુનાથ યતીશાનસ્ત્વદીયાન્સ્મરકારુણ્યદૃશો વિધેહિ પાત્રમ્ ।
ગણયેર્ભવદીયદાસદાસેષ્ટિતયાચેર ચિતાઞ્જલિઃ પ્રણમ્ય ॥ ૧૭॥

વિદ્યારત્નાકરોક્તાં ગુરુવરનુતિમાદરેણ યઃ પઠતિ ।
તસ્મિન્નામગિરીશો નરહરિરચિતઃ પ્રસીદતિ ક્ષિપ્રમ્ ॥ ૧૮॥

ઇતિ શ્રીવિદ્યારત્નાકરતીર્થવિરચિતં

શ્રીશેષચન્દ્રિકાચાર્યસ્તોત્રં સમ્પૂર્ણમ્ ।

Encoded and proofread by Krishnananda Achar

*Shri Sheshachandrikacharya Stotram*

pdf was typeset on June 15, 2020

Please send corrections to *sanskrit@cheerful.com*